International Journal of Jyotish Research: 2025; 10(2): 32-33

International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2025; 10(2): 32-33
© 2025 Jyotish
www.jyotishajournal.com
Received: 24-05-2025
Accepted: 30-06-2025

**राम् प्रसाद् यस्**
सहायक प्राध्यापकः, संस्कृत विभागः,
कुक्के श्री सुब्रह्मण्येश्वर महाविद्यालय
सुब्रह्मण्य, कर्नाटक, भारत

**Corresponding Author:**
**राम् प्रसाद् यस्**
सहायक प्राध्यापकः, संस्कृत विभागः,
कुक्के श्री सुब्रह्मण्येश्वर महाविद्यालय
सुब्रह्मण्य, कर्नाटक, भारत

# गृहारम्भात् पूर्वं वास्तुशास्त्रानुसारविचारविन्यासः एकं समीक्षात्मकविश्लेषणम्

**राम् प्रसाद् यस्**

**सारांश**
ब्रह्माण्डस्यैकस्मिन्गृहेऽङ्गत्वेन स्थितस्य मानवस्य मूलभूताः आवश्यकता इत्यत्र आशनं, वसनं वसतिश्चेति त्रयमपि प्रमुखं; तत्र वसतिः अन्येभ्यः प्राणिभ्यः भिन्ना विशेषा च मनुष्यस्य बुद्धिमत्वात् अभिव्यक्तिर्भवति। एकस्मिन्नर्थे उक्तं चेत्—विश्वस्याङ्गत्वेन स्वतन्त्रत्वं न सन्ति, तथापि "एषा मम गृहं" इत्यादिना परमार्थतः अधिकारबुद्धेः प्रारम्भः, सामान्यस्य स्वार्थस्य अपि आरम्भबिन्दुः गृहमेव। एषा तु पारमार्थिकदृष्टिः। लौकिकदृष्ट्या तु गृहमिति मनुष्यस्य स्वस्त्रीपुत्रादिभिः सह सुखेन एकान्तवासस्य स्थानम्, शीतोष्णादिभ्यः शरीरं रक्षणार्थं आश्रयः, च स च गृहस्थस्य मोक्षमार्गस्य सुगमकरणाय उपयुक्तानि शौतिकस्मार्तकर्माणि सम्पादयितुं आधारभूतं स्थानं च। एतेन कारणेनैव विश्वकर्मप्रमुखाः प्राचीनवास्तुविशारदाः गृहनिर्माणे विशेषं महत्त्वं दत्तवन्तः।

**कूटशब्दः** गृहनिर्माणः, भूमिप्रदेशः, विश्वकर्मः, सूत्रग्राही, वास्तुविशेष, भूमेः लक्षणम्, आचार्यवरणम्

## प्रस्तावना

अलक्षणयुक्तधामनि वसतां अशुभानि संभवन्त्येव" इति वास्तुविशेषज्ञानां मतम्— लक्षणहीने गृहे निवसन्तः जनाः पुनःपुनरपदं दुःखं प्राप्नुवन्ति। न केवलं तद्वदन्यस्य गृहे कृतानि शौतिकस्मार्तकर्माणि अपि तस्मै फलदायकानि न भवन्ति। अतः संसारी मनुष्यः स्वकीयं गृहं अवश्यं स्थापयेत्। तत् च गृहम् शुभलक्षणैः युक्तं भवितव्यम्। एतेन हेतोः वास्तुशास्त्रे प्राचीनैः आचार्यैः विविधाः मार्गनिर्देशाः विनियुक्ताः सन्ति। तत्र गृहनिर्माणात्पूर्वं विशेषतया यानि यानि प्रमुखानि बिन्दवः विचारणीयानि भवन्ति, तानि अत्र विवरणरूपेण प्रदत्तानि।

गृहनिर्माणस्य शुभत्वे त्रयः प्रमुखाः अङ्गाः मुख्यभूमिकां वहन्ति। तानि च—गृहारम्भस्य समयः, भूमेः लक्षणम्, च गृहनिर्माणकर्तृ। एतेषु आद्यः अङ्गः मुहूर्तसम्बन्धी अस्ति। गृहनिर्माणार्थं योग्यं निर्दोषं च दिनं दैवज्ञात् ज्ञात्वा, कर्ता गृहारम्भं कर्तव्यम्। अवशिष्टे द्वे अङ्गे तत्त्वपूर्वकं चिन्तनीयम्।

## आचार्यवरणम्:

गृहनिर्माणं कर्तुमिच्छुः पुरुषः स्वस्यानुकूल्यं प्रति शास्त्रसम्मतं गृहम् अविश्रान्तेन प्रकारेण निर्मातुं समर्थं पुरुषं यः चयनयति, स एव प्रक्रिया "आचार्यवरणम्" इत्युच्यते। पूर्वाचार्यैः गृहनिर्माणाय चत्वारः आवश्यकाः प्रकाराः निर्दिष्टाः—स्थपति, सूत्रग्राही, तक्षक, वर्धकी च। अत्र --

- स्थपति—गृहनिर्माणस्य गणितमूलकं आयं च, वास्तुशास्त्रस्य रहस्यं च जानाति।
- सूत्रग्राही—निर्माणकर्मणः दोषरहितं संचालनं कुर्वन् निरीक्षकत्वेन तिष्ठति।
- तक्षक—काष्ठकर्मणि निपुणः।
- वर्धकी—काष्ठाङ्गैः गृहनिर्माणं कुर्वन् शिल्पी भवति।

अतः एतेषां कर्मसु कौशलयुक्तान् एव पुरुषान् चयनयेत्। एषः विकल्पः भवनस्य सुरक्षा-दृष्ट्या अत्यावश्यकः।

## निवेशनस्य शुभाशुभत्वनिर्णयः

गृहनिर्माणस्थानस्य परीक्षणेन तद् प्रदेशः वासाय योग्यः अथवा अयोग्यः इति विषयः ज्ञातुं शक्यते। गृहनिर्माणस्य पूर्वभावे कर्ता एषां विचारं करणीयम्। यत्र स्थले गवां मनुष्याणां च नित्यं सञ्चारः भवति, यः प्रदेशः पूर्वदिकि अवनतः भवति, फलं दातुं समर्थैः वृक्षैः संयुक्तः भवति, सौम्यं मृत्तिकां यः धारयति, पदप्रसारणे कठिनः शब्दः उत्पद्यते, पर्याप्तजलनिधिः च अस्ति, सः भूमिप्रदेशः वासाय विहितः इत्युच्यते।

यः प्रदेशः वृत्ताकृतिः, अर्धवृत्तः, त्रिकोणः, पञ्चकोणः, षट्कोणः, त्रिशूलाकृतिः, जरायुयुतसदृशः, मत्स्यपृष्ठतुल्यः, गजपृष्ठसन्निभः, कूर्मपृष्ठनिभः, गोमुखसदृशः, मध्ये अवनतः, भस्मना, अस्थिभिः, अङ्गारेणुः, तण्डुलत्वक्, केशैः, वल्मीकैः च युक्तः प्रदेशः वासाय अयोग्यः इत्यभिधीयते।

**प्लवत्वं तथा वीथीनिर्णयः**

वासभूमेः अष्टदिशासु स्थितानि उन्नतावनतस्थलानि निरीक्ष्य वास्तुशास्त्रकारैः फलानि निर्दिष्टानि। प्लवत्वं नाम इत्युक्ते अवनतता इति अर्थात् भूमेः निम्नता। सामान्यतः यदा भूमिः पूर्वदिकि अवनता भवति तर्हि धनलाभः भवति।

- आग्नेयदिक् निम्नतां-- आग्निभयम्।
- दक्षिणदिक् निम्नतां -- मृत्युः।
- नैऋत्यदिक् निम्नतां -- धननाशः।
- पश्चिमदिक् निम्नतां --पुत्रहानिः।
- वायव्यदिक् निम्नतां --प्रवासः।
- उत्तरदिक् निम्नतां --धनप्राप्तिः।
- ईशानदिक् निम्नतां -- विद्यालाभः।

यत्र स्थलम् सर्वतोऽपि अवनतम् वा मध्यभागे अवनतम्, तादृशं निवेशनं वासाय अयोग्यम् इत्युच्यते।

**वीथिविचारः**

- वासतुशास्त्रे अष्टविधाः वीथयः निर्दिष्टाः।
- यदि पूर्वदिक् अवनता स्यात्, पश्चिमदिक् उन्नता स्यात्, तर्हि सा गोवीथिः इति कथ्यते।
- यदि आग्नेयदिक् अवनता, वायव्यदिक् उन्नता, तर्हि सा अग्निवीथिः।
- यदि दक्षिणदिक् अवनता, उत्तरदिक् उन्नता, तर्हि सा यमवीथिः।
- यदि नैऋत्यदिक् अवनता, ईशानदिक् उन्नता, तर्हि सा भूतवीथिः।
- यदि पश्चिमदिक् अवनता, पूर्वदिक् उन्नता, तर्हि सा जलवीथिः।
- यदि वायव्यदिक् अवनता, आग्नेयदिक् उन्नता, तर्हि सा नागवीथिः।
- यदि उत्तरदिक् अवनता, दक्षिणदिक् उन्नता, तर्हि सा गजवीथिः।
- यदि ईशानदिक् अवनता, नैऋत्यदिक् उन्नता, तर्हि सा धान्यवीथिः इत्युच्यते।
- एषु गोवीथिः, गजवीथिः, च धान्यवीथिः इत्येताः शुभप्रदा इति निगद्यते।

**देवालयसमीपस्थं गृहम्:**

यदि वासभूमेः समीपे देवालयं स्यात्, तर्हि गृहनिर्माणे किञ्चन नियमान् अवश्यं पालनं कर्तव्यम्। विष्णुक्षेत्रस्य पृष्ठभागे च वामभागे च मानवगृहं न स्थापनीयम्। तथैव काली, नरसिंह, शिव इत्यादीनां उग्रदेवतानां देवालयस्य पुरतः च दक्षिणपार्श्वे च गृहम् न स्थापयेत्। यदि अवनतस्थले देवालयं स्यात्, तर्हि तस्य दक्षिणपार्श्वे च पुरतः च गृहम् न स्थापनीयम्। देवालयात् उन्नते स्थले मानवगृहं स्थापयितुं न युक्तम्, तद् वर्जनीयम्।

**भूमिपरीक्षा:**

वासाय निर्धारितायाः भूमेः शुभत्वं परीक्ष्यते येन विधिना, सा प्रक्रिया एव भूमिपरीक्षा इत्युच्यते। एषा एकं सूक्ष्मं परीक्षणप्रक्रिया अस्ति, यस्य निमित्तं वास्तुशास्त्रे नानाविधानि उपायाः विस्तारतः चर्चितानि सन्ति। तेषु प्रमुखानि केचन उपायाः अत्र केवलं परिचायार्थं प्रदत्ताः।

१. भूमिं खनित्वा तत्र एकं गार्तं कृत्वा तस्मिन् धान्यैः पूर्णं घटं स्थापयेत्। तं तुम्रेन मृण्मयेन आवरणेन अच्छाद्य, तस्य पूर्वदिशायां क्रमशः श्वेत, रक्त, पीत, कृष्ण वर्णयुक्ताः वर्तिकाः प्रज्वालयेत्। मुहूर्तकालात् अनन्तरं या वर्तिका दीप्तिं वहति, तस्य वर्णस्य जातेः व्यक्तिभ्यः सा भूमिः युक्ता भवति इति ज्ञायते। अत्र—

- **श्वेतवर्णः** द्विजानां,
- **रक्तवर्णः** क्षत्रियाणां,
- **पीतवर्णः** वैश्यानां,
- **कृष्णवर्णः** शूद्राणां शुभदायकः इति गण्यते।

२. भूमौ गार्तं खनित्वा तस्मिन् जलं पूरयेत्। ततः पूर्णानि पुष्पानि तस्मिन्नेव जले स्थापितव्यानि। यदि पुष्पानि प्रदक्षिणगत्याः परिभ्रमन्ति तर्हि तद् शुभसूचकं भवति। एवं परिभ्रमणं कृत्वा पुष्पानि स्थिराणि जातानि चेत्,

- यदि तानि दिशासु स्थितानि स्युः तर्हि शुभम्।
- यदि तु विपरीतदिशासु (विदिक्षु) स्थितानि स्युः तर्हि अशुभम् इति ज्ञेयम्।

३. कर्तुः हस्तप्रमाणस्य दीर्घता, विस्तारः, गाम्भीर्यम् च यथावत् परिमाप्य, तेन तुल्यमेव एकं गार्तं (गुंड) निर्माय तदेव मृत्तिकया पूरयेत् । यदि सः गार्तः न सम्पूर्णतया पूर्यते, तर्हि तद् अशुभं। यदि सम्यग् पूर्यते, परंतु शेषं नास्ति, तर्हि तद् मध्यमफलदायकं। यदि गार्तं सम्यग् पूर्यते च, मृत्तिका अपि अवशिष्यते, तर्हि तद् शुभं। एवं प्रकारेण नानाप्रकारेण भूमेः परीक्षणं कृत्वा पश्चात् दिक्-निर्णयः करणीयः।

**दिक्-निर्णयस्य क्रमः**

प्राचीनकाले जनाः सूर्यप्रकाशेन जातं छायां आधारं कृत्वा वा उत्तरदिशि स्थितं ध्रुवनक्षत्रम् आश्रित्य दिक् ज्ञातवन्तः। अधुनातनकाले तु दिक्क्योचि (दिग्दर्शकयन्त्र) इत्यादीनि वैज्ञानिकोपकरणानि उपयुज्य दिक्-निर्णयः क्रियते।

**भूमिखननम्:**

भूमिखननम् इत्युक्ते भूमेः खुदनं, आखननं वा। एतत् कार्यं गृहारम्भे आधारभूतं दृढत्वं साधयितुं क्रियते। गृहकर्तुः हस्तप्रमाणपरिमितगाम्भीर्ये तस्मिन् स्थले गृहनिर्माणाय भूमिं खनित्वा, तस्मिन् कपिशिरसामानकायैः शिलाखण्डैः पूरयित्वा, दृढीकरणं कृत्वा, अनन्तरं गृहनिर्माणं आरभेत्।

**उपसंहार**

एवं प्राचीनवास्तुविशारदाः गृहनिर्माणस्य पूर्वभावे करणीयानि कर्माणि वास्तुशास्त्रे उल्लिखितवन्तः। वैज्ञानिकदृष्टिकोनात् अपि अत्र चर्चितानि विषयानि सङ्गत एव सन्ति। भूकम्पप्रभृतयः प्राकृतिकविपत्तयः येन प्रकारेण निरस्तुं शक्यन्ते, तादृशी विवेचना अपि वास्तुशास्त्रे दृश्यते। विशालं जगत् अतिक्रम्य विकसितं मानवकुलम्, स्वकीयस्य अङ्गुलिप्रमाणमात्रस्य भूमिभागे एतानि सर्वाणि विवेचनानि कर्तुं कष्टसाध्यं सत्यम्। तथापि यथाशक्ति शास्त्रीयपद्धत्याः अनुसारेण गृहनिर्माणं कृत्वा, तत्र क्षेमः च शान्तिः च लभ्यते इति निःसंशयं।

**अनुशीलितग्रन्थसूची**


1. वास्तुराजवल्लभ, श्रीमण्डनसूत्रधारविरचित, पं रामयत्नशर्मकृत हिन्दी टीका सहित, मास्टर खिलाडी लाल संस्कृत पुस्तकालय, वाराणासी, १९९६.
2. वास्तुविद्या, अज्ञातकर्त्ता, सम्पा. – डा. श्रीकृष्ण जुगनू, चौखाम्बा संस्कृत सीरीज, आफिस, वाराणसी, प्रथम संस्करण – २००९.
3. बृहज्जातकम्, रुद्रविवरणम्, चौखम्भा सुरभारती, वारणासी, 2007.
4. बृहत्संहिता, पं. श्री. अच्युतानन्द झा, संस्कृत प्रकाशनम्, वारणासी चौखम्भा, 1954.